कुक्कुटाहिः २ । इति हेमचन्द्रः ॥

कुक्कुटाहिः, पुं, (कुक्कुटः तच्चरण इव अहिः सर्पः ।) कुक्कुटाभसर्पः । इति हेमचन्द्रः ॥

कुक्कुटिः, स्त्री, (कुक्कुट इव आचरति । आचारे क्विप इन् ।) दम्भचर्य्या । इति हेमचन्द्रः ॥

कुक्कुटी, स्त्री, (कुक्कुटि + वा ङीप् ।) अन्तश्चर्य्या । इति मेदिनी ॥ व्येकी । इति शब्दरत्नावली ॥ टिक् टिकि इति भाषा शाल्मलीवृक्षः । इति जटाधरः । (यथा, सुश्रुते उत्तरतन्त्रे । ६० अः ॥) "कुक्कुटी सर्पगन्धाञ्च तथाकाणविषाणिके" ॥ योषिद्विशेषः । इति चिन्तामणिः ॥)

कुक्कुटीव्रतं, क्ली, (कुक्कुटी इति संज्ञकं व्रतं नियमविशेषः ।) भाद्रशुक्लसप्तमीकर्त्तव्यनियमविशेषः । तद्विवरणं ललितासप्तमीशब्दे द्रष्टव्यम् ॥

कुक्कुभः, पुं, (कुक्कुशब्दं भाषते । भाष् + बाहुलकात् डः । यद्वा कुक् इत्यव्यक्तं कौति शब्दायते । कु + बाहुलकात् भक् ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ३५ । मात्कुका इति भाषा ॥

कुक्कुरं क्ली, ग्रन्थिपर्णम् । इत्यमरः । २ । ४ । १३२ । गाँठियाला इति भाषा ॥ (अस्य पर्य्याया यथा,— "स्थौणेयकं वर्हिवर्हं शुक्लवर्हञ्च कुक्कुरम् । शीर्णरोम शुकञ्चापि शुकपुच्छं शुकच्छदम्" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥ गुणाश्चास्य स्थौणेयकशब्दे ज्ञेयाः ॥)

कुक्कुरः,पुं,(कोकते आदत्ते इति । कुक् + क्विप् । कुक् यत्किञ्चिदपि स्वहस्तं अन्नं दृष्ट्वा कुरति शब्दायते । कुर + कः ।) जन्तुविशेषः । कुकुर इति भाषा ॥ तत्पर्य्यायः । कौलेयकः २ सारमेयः ३ मृगदंशकः ४ शुनकः ५ भषकः ६ श्वा ७ । इत्यमरः । २।१०। २१ ॥ कुक्कुरः ८ शुनः ९ शुनिः १० श्वानः ११ । इति तट्टीका ॥ भषणः १२ भल्लूकः १३ वक्रलाङ्गूलः १४ रुतारिः १५ रात्रिजागरः १६ कालेयकः १७ ग्राम्यमृगः १८ मृगारिः १९ शूरः २० शयालुः २१ । इति राजनिर्घण्टः ॥

तस्य गुणाः ।

"वह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च षडेते च शुनो गुणाः" ॥

इति चाणक्यम् ॥ तस्य परीक्षा यथा ।

"मृगयार्थं शाकुनार्थं कौतुकार्थैर्महीक्षिता ।
श्वानः पोष्यास्ततस्तेषामथ वक्ष्यामि लक्षणम् ॥
गुणजातिप्रभेदेन शुनो भेदो ह्यनेकधा" । तद्यथा ।
"सात्त्विका राजसाश्चैव तामसाश्च त्रिधा मताः ॥
अश्रान्ता अपरिक्षीणाः पवित्राः स्वल्पभोजिनः ।
श्वानस्ते सात्त्विकाः प्रोक्ता दृश्यन्ते च क्वचित् क्वचित् ॥ १
कद्वा बहुभुजो दीर्घा गुरुवक्षस्तनूदराः ।
आकृष्ट्या आह्निकाश्च श्वानस्ते राजसा मताः ॥ २
अल्पश्रमेण ये श्रान्ता लम्बजिह्वा गुरूदराः ।
श्वानस्ते तामसा ज्ञेयाः सन्ध्यावनसमाश्रयाः ॥ ३
ब्रह्मादिजातिभेदेन चतुर्द्धा सर्व्व एव हि ।
शुभ्रा दीर्घा स्वल्पकर्णा लघुपुच्छास्तनूदराः ॥
मृगध्वजरवदन्ताश्च श्वानस्ते ब्रह्मजातयः ॥ १
रक्ताङ्गास्तनुलोमानो बलवर्णास्तनूदराः ॥
दीर्घा दीर्घा नखरदाः श्वानस्ते क्षत्रजातयः । २
ये पीतवर्णा मृदवस्तनुलोमान एव च ॥
कुद्धा कुद्धा लम्बजिह्वास्ते श्वानो वैश्यजातयः ॥ ३
कृष्णवर्णास्तनुमुखा दीर्घरोमाण एव च ।
अकुद्धाः श्रमयुक्ताश्च ते श्वानः शूद्रजातयः ॥ ४
लघुप्रमाणास्तु गुरूदरा ये
येऽमेध्यभक्षा बहुपुत्रकाश्च ।
प्रवृद्धपुच्छा लघुसूक्ष्मदन्ता
स्तेचान्त्यजाः कुक्कुरजातयः स्युः ॥ ५ ॥
द्विजातिचिह्नसंसर्गात् द्विजातिः श्वा भयावहः ।
लक्षणत्रयसम्बन्धात् त्रिजातिर्धननाशनः ॥

भोजोऽपि ।

द्विजातिर्व्वा त्रिजातिर्व्वा विजातिःश्वा महीभृताम् ।
भयं धनक्षयं शोकं विदधाति यथाक्रमम् ॥

इति भोजराजकृतयुक्तिकल्पतरुः ॥ (मुनिविशेषः । यथा महाभारते । २ । ४ । १७ ।
"कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च ।
मुनयो धर्म्मविद्वांसो धृतात्मानो जितेन्द्रियाः" ॥)

कुक्कुरद्रुः,पुं, (कुक्कुरः कुक्कुरगन्धोपलक्षितः द्रुर्वृक्षः ।) वृक्षविशेषः । कुकुरशोँका इति भाषा । तत्पर्य्यायः । ताम्रचूडः २ सूक्ष्मपत्रः ३ मृदुच्छदः ४ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । ज्वररक्तकफनाशित्वञ्च । इति मदनविनोदः ॥ "तन्मूलमार्द्रं निक्षिप्तं वदने मुखशोषहृत्" ॥ इति भावप्रकाशः ॥

कुक्कुरी, स्त्री, (कुक्कुर + स्त्रियां जातित्वात् ङीष् ।) कुक्कुरस्त्री । कुत्ती इति भाषा । तत्पर्य्यायः । सरमा २ श्वानी ३ सारमेयी ४ शुनी ५ भषी ६ । इति शब्दरत्नावली ॥

कुक्कुवाक्, पुं, (कुक्कुरस्य वाक् शब्द इव शब्दो यस्य ।) सारङ्गमृगः । इति राजनिर्घण्टः ॥

कुक्षः, पुं, (कुषनिष्कर्षे + "उन्दिगुधिकुषिभ्यश्च" । उणां ३ । ६८ । इति सः किच्च ।) कुक्षिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुक्षिः,पुं, (कुषनिष्कर्षे + "प्लुषिकुषिशुषिभ्यः क्सिः" । उणां ३ । १५५ इति क्सिः ।) उदरम् । इत्यमरः । २ । ६ । ७७ ॥ (यथा, महाभारते १ । ७७ । १३ । "यातोषितं विशालाक्षि ! त्वया चन्द्रनिभानने ! । तथाहमुषितो भद्रे कुक्षौ काव्यस्य भाविनि !" ॥ दानवविशेषः । यथा महाभारते १ । ६७ । ५७ । "कुक्षिस्तु राजन् विख्यातो दानवानां महाबलः" ॥)

कुक्षिम्भरिः, त्रि, (कुक्षिं बिभर्त्तीति । भृ + खः + मुम् च ।) आत्मम्भरिः । स्वोदरपूरकः । इत्यमरः ३ । १ । २१ ॥

कुक्षिरन्ध्रः, पुं, (कुक्षौ रन्ध्रं छिद्रं यस्य ।) नलः । इति निर्घण्टः ।

कुङ्कुमं, क्ली, (कुमकुम् इति शब्दोऽस्ति वाचकत्वेनास्य अर्श आद्यच् । यद्वा कुकते आदीयतेऽसौ । कुक आदाने उमक् निपतनात् मुम् ।) स्वनामख्यातगन्धद्रव्यम् । कुमकुम् इति केशर इति भाषा । (यथा माघे ११।१४ । "कृतधवलिमभेदैः कुङ्कुमेनेव किञ्चित् । मलयजरजोभिर्भूषयन् पश्चिमाशाम्" ॥) तत्पर्य्यायः । काश्मीरजन्म २ अग्निशिखम् ३ वरम् ४ वाह्लीकम् ५ पीतनम् ६ रक्तम् ७ सङ्कोचम् ८ पिशुनम् ९ धीरम् १० लोहितचन्दनम् ११ । इत्यमरः । २ । ६ । १२४ । चारु १२ वाह्लिकम् १३ वरवाह्लीकम् १४ रक्तचन्दनम् १५ । इति तट्टीका ॥ अग्निशेखरम् १६ अरुणम् १७ काश्मीरजम् १८ पीतकम् १९ काश्मीरम् २० रुचिरम् २१ शठम् २२ शोणितम् २३ घुसृणम् २४ वरेण्यम् २५ अरुणम् २६ कालेयकम् २७ जागुड़म् २८ कान्तम् २९ वह्निशिखम् ३० केशरवरम् ३१ गौरम् ३२ केसरम् ३३ हरिचन्दनम् ३४ खलम् ३५ रजम् ३६ दीपकम् ३७ लोहितम् ३८ सौरभम् ३९ चन्दनम् ४० इति शब्दरत्नावली ॥ अस्य गुणाः । सुरभित्वम् । तिक्तत्वम् । कटुत्वम् उष्णत्वम् । कासवातकफकण्ठरोगमूर्द्धशूलविषदोषनाशित्वम् । रोचनत्वम् । तनुकान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥ रेचकत्वम् विवर्णताकण्डूनाशित्वञ्च । इति राजवल्लभः ॥ स्निग्धत्वम् । शिरोव्रणव्रणजन्तुवमिव्यङ्गदोषत्रयापहत्वम् । बल्यत्वञ्च । इति भावप्रकाशः ॥ त्वग्दोषनाशित्वम् । इति रत्नावली तत्त्वचन्द्रिका च ॥ देशभेदे तत् त्रिविधम् । यथा,—

"काश्मीरदेशजे क्षेत्रे कुङ्कुमम् यद्भवेद्धि तत् ।
सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् ॥ १ ॥
वाह्लीकदेशसंजातं कुङ्कुमं पाण्डुरं भवेत् ।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम् ॥ २ ॥
कुङ्कुमं पारसीकेयं मधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम्" ॥ ३ ॥

इति भावप्रकाशः ॥

कुङ्कुमी, स्त्री, (कुङ्कुमवर्णोऽस्त्यस्याः । अच् गौरादित्वात् ङीष् । ततः पृषोदरादित्वात् साधुः ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (कुङ्कुमीति केचित् ॥)

कुच, ज रोधपर्क्कौटिल्यलेखने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं, 'अकं च-सेट्-ज्वलं ।) ज कोचः कुचः । रोधः क्रियारोधः जड़ीभाव इत्यर्थः । अस्मिन्नर्थे एव प्रायो वर्त्तते । यस्मिन् प्रमुदिते राज्ञि तमः सङ्कोचति क्षितौ । पर्कः सम्पर्कः । इति दुर्गादासः ॥

कुच, शि सङ्कोचे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं,सेट् ।) प्रायः संपूर्व्वस्य प्रयोगः । शि-संकुचति अकुचीत् चुकोच । इति दुर्गादासः ॥

कुच, तारशब्दे । उच्चैःशब्द इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कोचति ढक्का । भट्टमल्लस्तु तारे शब्दे च कोचति इति नानार्थे पठति । तन्मते तारश्चिक्कणता । कोचति कार्द्धौ वणिक् चिक्कणयतीत्यर्थः । इति दुर्गादासः ॥

कुचः, पुं, (कुचति संकुचतीति । कुच् संकोचे । "इगुपधेति" । ३ । १ । १३५ । कः ।) स्तनः । इत्यमरः । २ । ६ । ७७ । (यथा गोः रामायणे । ५ । १३ । ५७ ।